राज्ञोवाच ॥ मुने कथय सर्वज्ञ भूयः किंचिदनुत्तमं । तत्वमेतस्य
धर्मस्य येन सिद्धिरवाप्यते ॥ १ ॥ ऋषिरुवाच ॥ भूयः शृणु महाभाग
देवीमहात्म्यमुत्तमं । विनायेन स्तवश्चायं निर्जितो नृपनंदन
दृष्ट्वा शुंभनिशुंभौ हंतुं दारुणं देवकंटकं । आजग्मुः परमानंदं ब्रह्मा
विष्णुमहेश्वराः । देवास्तुतिं समाधाय गतनालक्ष्म्या संयुताः
बद्धांजलिपुटः साक्षात्तुष्टुवुः क्रमशः स्तुति ४ लोकानां च हि
तार्थाय देवीसूक्तानि पार्थिवः । ब्रह्मा सरस्वतीसूक्तं लक्ष्मी

२१

सूक्तं जनार्द्दनः सूक्तं तथा मलाकाल्या शंकर स्वयमब्रवीत्॥
ब्रह्मोवाच॥ अजां पुराणीममरां सनातनां चतुर्भुजां पुस्त
कमक्षधारिणीं॥ वराभयाभ्यामनुशोभितां तां समाहितां जा
ड्यजडाविनाशिनीं॥२॥ सरस्वतीं तां मनुजोभिवाछं वाच
स्पदां स्वरवराधिरूढां॥ मुक्तामणिद्योतितकंठहारां भा
ग्यैकलभ्यां परमां पवित्रां॥३॥ श्रीकंठः शक्तित्रयशोभमानां
दशार्द्धतूर्येण कृतानुरूपां॥ पंचारवासांध्वनभृद्गहीशां सर

स्वतीत्वां प्रणवामिदेवीं ॥ कलाढ्ययंत्रामघकोटनाशगं विलारयं

त्राविमलैकशोभां ॥ स्वछावदातां स्फटिकानुरूपां सरस्वतीं

त्वां प्रणमामि मातः ॥ १० ॥ वाकामकोमैः परैमैः पवित्रैरमारमाहीं

वरदानदक्षैः ॥ बिंजैरमाभिः कपिबीजयुक्तैर्द्वयुग्मभित्रैरि

तिमंत्रराजः ॥ ११ ॥ एकेनचैकेनचयुग्मकेनद्वाभ्यांमथैकेनतैये

वशेषैः ॥ वरांगकुप्तिः परमोत्तमाया निहंति पापानि ~~बसा~~ धकानां

हंटटनैवेश्टंखलयाचरस्रष्याविधातृपत्न्याञ्चतथैववाचां ॥

चसार २

२

श्रीकंठब्राह्म्याकिलशोभयाचन्यासैरमीभिर्यतितोपिशंभुः ॥१३॥
द्रवेणहेमात्सकलार्थसिद्धिः सुकिंशुकैर्वागपिसिद्धिमृच्छेत्
सहायचर्येणरमानिवासः सोपायसेनापिचवेदसिद्धिः ॥१४॥
नचांबतेमहिमानंविदामः सरस्वतीप्रथितालोकमध्ये ज्ञा
नंतिकिंबुद्धबुद्धभूमिंतोयेजडावयंब्रम्हहरीशमुख्या ॥१५॥
तथैववाचावयसंविदामोजिह्वामशक्यातथैवाप्यजीवाः
पश्यामहेत्वांहिमातर्महिमस्पृशामसाक्षात्वयिसंयुतायाः ॥१६॥

स्कादं विद्यामस्त्वं वेशात्कियोगायत्र्या महेशीनवेशाज्जया महेशी
गछामहेन वेशात्के ब्रभावादानंदर्युकास्त्वं सन्निवेशात् ।
आत्मा मनस्त्वं त्वमेवासि देवा त्वमेवैव चेंद्रियपंचतत्वं । त्वमे
वैव विषयः शब्दमुख्याः परापरेशी परमात्ममेव । १४ । रवि-
श्चेत चंद्रमाश्चेत तारकाश्चेत आपश्चेत तेजश्चेत वायुश्चेत-
व्योमश्चेत स्पर्शश्चेत रूपंचेत । रसश्चेत गंधश्चेत प्राणश्चेत
पानश्चेत व्यानश्चेत उदानश्चेत समानश्चेत नागश्चेत कूर्मश्च

तेककलश्चतेदेवदत्तश्चतेधनंजयश्चते भूतात्माचतेअं
तरात्माचतेनपरमात्माचतेज्ञानात्माचते सर्वात्माचतेममचि
त्तंत्वनत्वय्येव विनिविश्यतां ॥१९॥ यदानचाहं भुवनानिजी
वानाहं विष्णुर्नचपार्वतीशः नचेश्वरोनापिसदाशिवश्च
त्वमेवचासीद्विनिवाभविष्यसि ॥२०॥ कालस्त्वमेवासि
जगत्त्रयाणांस्वभाववीर्यादिककृत्वमेव ॥ त्वमेवविश्वंपरमा
त्मशक्तिं नमामितेपादपीठंसरस्वती ॥२१॥ त्वंवेदवाणीनि

खिलाश्चवेदास्त्वंवेदशक्तिश्चतथार्थशक्तिः त्वंब्रह्मविद्या-
सिपरापरेसि त्वंब्रह्मशक्तिंशरणंप्रपद्ये ॥ २२ ॥ सत्त्वंचेदंसु
भगेसरस्वति प्रातश्चमध्याह्नकालेचसायं । पठंतियेश्रद्ध
यापूतचित्तास्तेभोगमोक्षौसहसालभंते ॥ २३ ॥ नतेकुयोनिं
नदरिद्रतांचव्याधिंतापंनचतेलभंते । तएवधन्याश्चच
तएवपूज्यांसर्वत्रमानोभवतीहतेषां ॥ २४ ॥ इदंपुराणंविज्ञा
सुधामयंतत्त्वभूतंजगत्त्रयाणां । तेप्राप्नुवंतिसगदंप्रभावा-

स्तवांसर्वयोनिंशरणंमप्रधे ॥ ऋषिरुवाच ॥ स्तुत्या

नयावेदवाक्यासर्वसारस्वरूपया ॥ प्रसन्नादेवदेवेसि

महातुर्वासिरस्वती ॥ आविर्भूतामहादेवीब्रह्मनो

षेककारिणी ॥ उवाचवचनंदेव्यंब्रह्मानंदप्रदायकं ॥

श्रीदेव्युवाच ॥ स्तुत्यानयानतेब्रह्मनृषिनोषसमन्वितः

स्तुतास्मित्रियतांदेववरः संतोषकारकः ॥ ब्रह्मोवाच

अंतर्धर्मिमनोदेविहृदंभुवतुसर्वदा ॥ एषएववरःसाक्षा

दुत्तेमा क्रियते मया ॥ ॥ स्वसूक्तं चापि देवेशि तेजो दिव्यं वि
धीयतां ॥ येन कार्याणि सिध्यंति साधकानां महात्मनां ॥ ३०॥
श्रीदेव्युवाच ॥ सर्वदा नमनो देव कुले धर्मेषु पूजिते ॥ इदं भव
तु सूक्तं च मसा ज्ञानं मे परंतप ॥ ३१॥ सर्वसिद्धिं परं चास्तु परमा
नंद दायकं ॥ विना सूक्तं पठेद्यस्तु स्तोत्रं सहस्रशानी निच ॥
मृतगामि स विज्ञेयो नरकावासतत्पर: ॥ ममैवाज्ञापराधे
न ब्रह्मज्ञानां गतिं व्रजेत् ॥ एवमुक्ता वचो देवी तूष्णीमासी-

५

नृपोत्तम ॥ इदं सरस्वतीसूक्तं ॥ अथांजलीसमादाय हरीर्मो
वाच विश्वकृत् ॥ ३४ ॥ श्रीहरिरुवाच ॥ परात्परेशां जगदादिभूतां
वरं वरेण्यां वरदां वरिष्ठां ॥ वरेश्वरीं बहुवाग्भिः प्रगीतां त्वां वि
श्वयोनिं शरणं प्रपद्ये ॥ ३५ ॥ श्रियं समस्तैरधिवासभूतां मह
सुलक्ष्मीं धरणीधराणां ॥ अनादिमादिं परमार्थरूपां त्वां वि
श्व० ॥ ३६ ॥ एकामनेकां विविधां सुकार्यैः सुकारिणीं सदसद्रू
पिणीं च रूपां स्वरूपां च शिवप्रदां त्वां विश्व० ॥ ३७ ॥ सर्वश्रियां-

सर्वजगन्निवासं श्रीमन्महालक्ष्मीमनादिदेविं ॥ शक्तिस्व
रूपांच शिवंस्वरूपां त्वां विश्व॰ ॥१२॥ कामाभिदां श्रीमधिवास-
भूतां त्वां रूपिणीं कपिबीजभावां ॥ कलार्थबीजां परमार्थसं
ज्ञां त्वां विश्व॰ ॥१३॥ वैश्वानरस्त्रीसहितेन देवी श्रीमंत्रराजेन
विराजमानं ॥ सर्वार्थदात्रीं परमां पवित्रां त्वां विश्व॰ ॥१४॥ त्रिको
णपंचारयुगस्रभावां षट्कोणमिश्रां द्विदशारमिश्रां ॥ अष्टारच
क्राधिनिरासंभूतां त्वां विश्व॰ ॥१५॥ पुनर्दशारद्वितियेन युक्तां ।

पंचारकोणां किंतविग्रहंच ॥ यंत्राधिवासामपियंत्रभूतां त्वांविश्व॰ ॥४३॥
संभाविनां सर्वदान्यासगम्यां सर्वस्वरूपामपि सर्वसेव्यां
सर्वाक्षरं न्यासवशां वरेण्यां त्वां विश्व ॥ ॥ स्रष्टिस्थितिप्रळया
ख्यैश्च बीजैर्न्यांसंविधायत्रजपंतियेत्वां ॥ तएवराज्यं इनि
घृष्टपाशाविद्याधराइवशोभांलभंते ॥४४॥ प्रभुज्ययंत्रं विधि
नाम्नेहशींसन्यासपूता: परमासिभाग्यां ॥ जपंतियेत्वां परमा
र्थधात्रीं तएवधन्या: कुलमार्गनिष्ठा: ॥४५॥ आनंतिकीं

प्रज्ञानः कुशाग्राग्र्यै महागिरिगीते महिमामलेऽशी ॥ केचिन्मर्त्तं
तोनिजधर्मलिभाजानं निर्लेदनिपरंसधाम ॥ ४६ ॥ विश्वा
ताकुंडं विधिनास्थंडिलं वासोमागं धिलोमं सफलं प्रकुर्वंति
ततोषणाज्जायते भाग्यमंत्रं तेषांसुदेवैरपिदुर्लभ्यं ॥ ४७ ॥
पुनस्कृतिंभयतोविश्वमानस्तोत्रैरुदारैः कुलयोगयुक्ताः
तएव धन्याः परमार्थ भाजोभोगश्च मोक्षश्च करेऽस्ति तेषां ॥ ४८ ॥
ऋषिरुवाच ॥ इतिश्रीस्कृतया देवीमहालक्ष्मीं ददर्श सः ॥

ग ४

चतुर्भुजां त्रिनयनां महिषासुरघातिनीं ॥४९॥ अस्य श्रीम
न्महालक्ष्मीप्रसन्नास्तु नित्यं गौरवात् ॥ उवाच शिवशोभाढ्या
नारायणमन्त्रं शुभं ॥५०॥ श्रीदेव्युवाच ॥ वरं वरय देवेश नारा
यण सनातनं ॥ ज्ञास्याम्यप्रज्ञातव्यं स्तव स्तुत्या वशीकृतं ॥५१॥
श्रीनारायण उवाच ॥ मातुः परमकारुण्ये महालक्ष्मीवर
प्रदे ॥ कुलाचारे मनो मे स्तु दृढं ते स्तु तथा शिवे ॥५२॥ तव सन्
तं च सफलं तव सुप्रीतिकारणं ॥ श्रीदेव्युवाच ॥ एवम

स्तु महाभाग नारायण सनातनं ॥५३॥ सूक्तमेतद्द्विजा यस्तु प-
ठेत्स सततं नरः । स याति न मतां घोरं नरकं दारुणं कलौ ।
लिप्यते परमा छाया पापममकोपं विघूर्णितः । लक्ष्मीसूक्तं विना
सततमस्मिं स्तोत्रं निषिध्यन्ति ॥५५॥ ऋषिरुवाच । एवमुक्त्वा
वचो देवि तूष्णींभावं गता तदा ॥ इति महालक्ष्मीसूक्तं
समाप्तं ॥ ततोन्त्वलिं समाध्याय शिवोवाच मुदायुतः ॥५६॥
तुष्टाव वाग्भिर्दिव्याभिर्महाकालिं महेश्वरः । वेदवाणीपुनता

भिर्लोकानां हितकाम्यया [illegible] शिवामुनिंध्या विविधप्र-
भावां कालीं कलामुग्रां काम्ययी [illegible] ल्लिनि विर्भवंध्यां । कपा
लखड्गांगधरान्नमुंडमाला विभूषां मृगचर्मशोभां ।
सशुष्कमांसां चशुष्कांनासनन्यस्थां विभीषणं भीषयंतीं सुरारीन् ॥
रक्तप्रियायां चमद्राचघूर्णां कालीं शरण्यां शरणं प्रपद्यामि ॥
सुघोरबीजं कपीश्वरश्च चिंतामणिं कुब्जकं कामराजं ॥
विद्येव विद्या पुनः कामराजं कामः कलामा ह्रिं क्लिकामराजं ॥

वंदेनंधभूर्मंत्रराजोनवमीशो विश्वंपुरस्त्रीश्वरिदेववंद्ये। मंत्रेणचा
न्येनसिध्यंतिसर्वाः सुसिद्धयः सर्वजगन्निवासे। पंचारयु
ग्मंचत्रिकोणयुग्मंपुनःश्चपंचारयुगेनबाह्यं। करीरत्रकोष्ठंके
लभूगृहंचयंत्रेश्वरंनवपादाब्जवासं। संपूज्ययंत्रंतवविश्व
नायकेनिःपापिनःसहसासंभवंति। येसाधकास्तवमार्गा
नुसारिणः कुलानुदूत्याः परमाः पवित्रा। तेसिद्धिमृद्धिंचय-
शोनुगम्यान्नृणांवशीकृत्यभवंतीभूपाः। समस्तमंत्रेषुविधायचां

गंत्वासमाधिकं भक्तिसुभावयुक्ताः ॥६४॥ ते किंकरीकृत्य

रणंतिदेवानीशोजगत्यैक विभूतियुक्तैः ॥ वदामि नान्य

न्शृणोमि चान्यं नृणामि नान्यं न विचिंतयामि ॥ ६५ ॥ स्म

रामि नान्यं न भजामि चान्यं ध्यायामि नान्यं न वितर्कयामि

गायामि नान्यंत्तव पादसंज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये ॥६६॥

एवांत्तदेवं त्वमिह स्ति देवि नाराधयंतीं जनाश्च पेकुबुध्व्य ॥

अंधंतमः प्रविशंति सदा तेन मादर्शनं संस्कृतेषां दुरात्मनां ॥ ६७॥

ऋषिरुवाच ॥ इति वाक्यं समाकर्ण्य परमामृतसंमितं ॥ प्र-
सन्ना भून्महाकाली प्रियतामी प्रियतोत्रतः ॥६४॥ इत्युक्त्वा
ऋषिरमला शीघ्रं भोरानंददायिनी ॥ प्रसन्नापरमाल्हा-
दसंयुता शिवभाषणात् ॥६५॥ श्रीदेव्युवाच ॥ प्रियतांम
नुरोभीष्टोवरो जगति दुर्लभः ॥ ह्यस्यान्यभर्तात्व्यं लवास्य
ता वशीकृता ॥६६॥ शिवउवाच ॥ कुलाचाररता देवि मातर्मे
स्त्वकदाचन ॥ शिथिला देवदेवेसि सत्त्वं च सफलं तव ॥६७॥

श्रीदेव्युवाच ॥ एवमस्त्विति चोक्त्वा हि तिरोदेव्याः सनात
नः ॥ अंतर्धिमायुः परमा एकस्मिन्नास्थिता भवन् ॥ ५२ ॥
पठनाच्च सतां देवा स्तोत्रांश्च वचनं मुदा ॥ संतोषयंति च मु
हुर्लोकानुग्रहतत्पराः ॥ ५३ ॥ श्रीदेव्युवाच ॥ शृणुध्वं प्रीतिसं
युक्ता ब्रह्माविष्णुमहेश्वराः ॥ देवीसूक्तं पठंध्येयं भविष्यति
सर्वार्थदः ॥ ५४ ॥ देवीसूक्तं विना देवी ये च सप्तशतीं नरः
स्तोष्यंति च पठिष्यंति तेषां शापः पदे पदे ॥ ५५ ॥ देवीसू

क्तं विनापाठोत्यरुष्येरोदनंयथा ॥ स्तोत्रंध्यायेनचानेनपूर्ण
स्तोत्रमभूदिदं ॥ ७६ ॥ देवाऊचुः ॥ मातःसप्तशतीस्तोत्रंफल
स्तुतिमलोच्यतां ॥ यांसमाकर्ण्यजीवानांविश्वासोजायते
भृशं ॥ ऋषिरुवाच ॥ इतिवाक्यंसमाकर्ण्यब्रह्मविष्णुशिवादि
तं ॥ फलस्तुतिमथीवाचस्तोत्रस्यास्यमहामते ॥ ७८ ॥ इति
रुद्रयामलेघटतंत्रेदेवीमाहात्म्येदेवीसूक्तंसमाप्तं ॥ इति
कालीसूक्तं ॥ श्रीदेव्यार्पणमस्तु ॥ श्रीगुरुमूर्तिर्जयति ॥ छ ॥

११